दिग्धविद्धक्रियास्तत्र यथावदवचारयेत् ॥
नावसन्नं नचोत्सन्नमतिसंरम्भवेदनम् ।
दंशादौ विपरीतार्त्ति कीटदष्टं सुबाधकम् ॥
कीटैर्दष्टानुग्रविषैः सर्पवत् समुपाचरेत्” ॥
इति सुश्रुते कल्पस्थाने ८ अध्यायः ॥)

कीटकः, पुं, (कीट्+संज्ञायां अल्पार्थे स्वार्थे वा कन् ।) मागधजातिः । इति धरणी ॥ कृमिजातिः । निष्ठुरे त्रि । इति मेदिनी ॥

कीटघ्नः, पुं, (कीटं हन्ति । हन्+टक् ।) गन्धकः । इति राजनिर्घण्टः ॥ (गन्धकशब्देऽस्य गुणादयो बोद्धव्याः ॥)

कीटजा, स्त्री, (कीटेभ्यो जायते । जन्+डः । टाप् ।) लाक्षा । इति रत्नमाला ॥ (लाक्षाशब्दे ऽस्या गुणादिकं ज्ञेयम् ॥ कीटसम्भवे, त्रि, । यथा महाभारते २ । ५ । २३ ।
“कौशिकं रांकवञ्चैव पट्टजं कीटजन्तथा” ॥)

कीटपादिका, स्त्री, (कीटाः पादे मूलेऽस्याः । कीटपाद+कप् । अत इत्वं टापि ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥

कीटमाता, स्त्री, (कीटानां माता इव । मूलदेशात् बहुलकीटोत्पन्नत्वात्तथात्वम् ।) हंसपदीवृक्षः । इति भावप्रकाशः ॥ (हंसपदीशब्दे ऽस्या गुणपर्य्याया बोध्याः ॥)

कीटमारी, स्त्री, (कीटं मारयति । मृ+णिच्+अण् । उपपद मासः । गौरादित्वात् ङीष् ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥

कीडेरः, पुं, (कील+एरच् । लस्य डः ।) तण्डुलीयशाकः । इति भावप्रकाशः ॥

कीदृक्, [श्] त्रि, (कस्येव दर्शनमस्य क इव दृश्यते इत्यादि वा । किम्+दृश्+क्विन् । “इदं किमोरीश्की” ।६।३।९० । इति क्यादेशः ।) किम्प्रकारः । इति व्याकरणम् ॥ (यथा नैषधे १ । १३७ ।
“विलोकयन्त्या रुदतोऽथ पक्षिणः
प्रिये स कीदृक् भविता तव क्षणः” ॥)

कीदृशः,त्रि,(क इव दृश्यते ऽसौ कस्येव वा दर्शनमस्य । किम्+दृश्+कञ् ।) किम्प्रकारः । इति व्याकरणम् ॥ (यथा, महाभारतम् ॥)
“कीदृशाः साधवो विप्राः केभ्यो दत्तं महाफलम् ।
कीदृशानाञ्च भोक्तव्यं तन्मे ब्रूहि पितामह !” ॥)

कीनाशः, पुं, (क्लिश्नातीति । क्लिशू विबाधने वधे वा । “क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम् च” । उणां ५ । ५६ ॥ इति कन् उपधाया ईत्वं ललोपो नामागमश्च ।) यमः । इत्यमरः ३ । ३ । २१४ ॥ (“विधेहि कीनाशनिकेतनातिथिं ।” माघः । १ । ७३ ॥) वानरविशेषः । इति तट्टीकायां स्वामी ॥

कीनाशः, त्रि, (क्लिश्नातीति । क्लिशूविबाधने वधे च । “क्लिशेरीच्चोपधाया लोपश्च लो नाम् च” । उणां ५ । ५६ । इति कन् उपधाया ईत्वं ललोपो नामागमश्च ।) कर्षकः । (यथा मनुः ९ । १५० ।
“कीनाशो गोवृषो यानमलङ्कारश्च वेश्म च ।
विप्रस्यौद्धारिकं देयमेकांशश्च प्रधानतः” ॥)
क्षुद्रः । पशुघाती । इति मेदिनीकरहेमचन्द्रौ ॥

कीरं, क्ली, (कीलति बध्नाति शरीरम् । कील+अच् । लस्य रः ।) मांसम् । इति राजनिर्घण्टः ॥

कीरः,पुं, (कीति अव्यक्तं ईरयतीति । ईर+णिच्+अच् ।) शुकपक्षी । इत्यमरः २ । ५ । २१ ॥ (यथा, नैषधे २ । १५ । “खगवागियं इयतोऽपि किं न मुदं धास्यति कीरगीरिव” ॥)

कीरकः, पुं, (कीर+संज्ञायां कन् ।) वृक्षभेदः । स्थपणकः । प्रापणम् । इति धरणी ॥ (शुकपक्षी । इति आचार्य्याः ॥)

कीरवर्णकं, क्ली, (कीरस्येव वर्णो यस्य । वर्ण+कप् ।) स्थौणेयकनामसुगन्धिद्रव्यम् । इति राजनिर्घण्टः ॥ (स्थौणेयकशब्दे विवरणमस्य ज्ञातव्यम् ॥)

कीराः, पुं, (क+ईर+णिच्+अच् पृषोदरात् साधुः ।) काश्मीरदेशः । तद्देशस्थजनः । बहुवचनान्तोऽयं शब्दः । इति मेदिनीत्रिकाण्डशेषौ ॥

कीरेष्टः, पुं, (कीरस्य शुकस्य इष्टः प्रियः ।) आम्रवृक्षः । आक्षोटवृक्षः । जलमधूकवृक्षः । इति राजनिर्घण्टः ॥

कीर्णः, त्रि, (कीर्य्यतेऽसौ । कॄ+कर्म्मणि क्तः ।) आच्छन्नः । विक्षिप्तः । (यथा, शाकुन्तले १माङ्के ॥
“ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्ब्बकायम् । शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वात् वियति बहुतरं स्तोकमुर्व्व्यां प्रयाति” ॥) हिंसितः । इति मेदिनी ॥

कीर्त्तनं,क्ली, (कॄत्+भावे ल्युट् ।) कथनम् । वचनम् । इति जटाधरः ॥ (यथा, मार्कण्डेये ९२ । २२ ।
“रक्षां करोति भूतेभ्यो जन्मनां कीर्त्तनं मम” ॥)

कीर्त्तना, स्त्री (कॄत्+कर्म्मणि युच् टाप् च ।) यशः । इति शब्दरत्नावली ॥

कीर्त्तिः, स्त्री, (कॄत्+क्तिन् । यद्वा, कॄत् संशब्दने “इगुपधात्कित्” उणां ४ । ११९ । इत्यादिकार्य्ये इन् ।) सुख्यातिः । तत्पर्य्यायः । यशः । समज्ञा ३ । इत्यमरः १ । ६ । ११ ॥ समाज्ञा ४ समाख्या ५ समज्या ६ । इति तट्टीकायां भरतः ॥ अभिख्या ७ श्लोकः ८ वर्णः ९ । इति जटाधरः ॥ कीर्त्तना १० । इति शब्दरत्नावली ॥
“दानादिप्रभवा कीर्त्तिः शौर्य्यादिप्रभवं यशः” ॥ इति माधवी । अत एव यशःकीर्त्त्योर्भेदस्याति दर्शनात् “यशःकीर्त्तिप्रविभ्रष्टो जीवन्नपि न जीवति” इति कस्यचित् प्रयोगः । जीवतः ख्यातिर्यशो मृतस्य ख्यातिः कीर्त्तिरिति केचित्तन्न साधु “कीर्त्तिस्ते नृपदूतिकेति” प्रयोगदर्शनात् । इति भरतः ॥ * ॥ प्रसादः । इति मेदिनी ॥ शब्दः । दीप्तिः । मातृकाविशेषः । इति शब्दरत्नावली ॥ विस्तारः । कर्द्दमः । इति विश्वः ॥

कीर्त्तितः, त्रि, (कॄत्+क्तः ।) कथितः।ख्यात । यथा,—भावप्रकाशे ॥
“कुष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता” ॥

कीर्त्तिभाक्, [ज्] पुं, (कीर्त्तिं भजते । भज+ण्विः ।) द्रोणाचार्य्यः । इति शब्दरत्नावली ॥ कीर्त्तियुक्ते त्रि ॥ यथा,—महाभारते १ । ८३ । ४१ ।
“राज्यभाक् स भवेद्ब्रह्मन् ! पुण्यभाक् कीर्त्तिभाक् तथा” ॥)

कीर्त्तिमान् [त्] पुं, (कीर्त्तिरस्यास्तीति मतुप् ।) वसुदेवज्येष्ठपुत्त्रः । (यथा भागवते ९ । २४ । ५३ ।
“वसुदेवस्तु देवक्यां अष्टपुत्त्रानजीजनत् ।
कीर्त्तिमन्तं सुषेणञ्च भद्रसेनमुदारधीः ।
ऋजुं संमर्दनं भद्रं सङ्कर्षणमहीश्वरम्” ॥)
कीर्त्तिविशिष्टे त्रि ॥ (यथा, रघोः रामायणे १।२।४२।
“उदारवृत्तार्थपदैर्मनोरमै-
स्तदास्य रामस्य चकार कीर्त्तिमान् ।
समाक्षरैः श्लोकशतैर्यशस्विनो
यशस्करं काव्यमुदारदर्शनः” ॥)

कीर्त्तिशेषः,पुं, (कीर्त्तिः शेषो यस्य ।) मरणम् । इति जटाधरः ॥

कील, बन्धे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चतुर्थस्वरी । कीलति । इति दुर्गादासः ॥

कीलः, पुं स्त्री, (कील्यते बध्यतेऽसौ अनेनात्र वा । कील बन्धे+कर्म्मणि करणेऽधिकरणे च यथायथं घञ् पुंसीति घोवा ।) अग्निशिखा । शङ्कुः । इत्यमरः ३ । ३ । १९६ ॥ (यथा, महाभारते । ३ । १५ । १५ ।
“परिखाश्चापि कौरव्य! कीलैः सुनिचिताः कृताः” ॥ तथा च आर्य्यासप्तशती ३७४ ।
“या लुप्तकीलभावं याता हृदि वहिरदृश्यापि” ॥) स्तम्भः । लेशः । कफोणिः । इति मेदिनी ॥ कफोणिनिर्घातः । इति विश्वः ॥ (मूढ़गर्भस्य प्रकारभेदः । यथा । “तत्र ऊर्द्ध्वबाहुशिरः पादौ यो योनिमुखं निरुणद्धि कील इव स कीलः” ॥ इति सुश्रुते निदानस्थाने ८ अध्याये ॥)

कीलकः, पुं, (कीलति बध्नाति अनेन । करणे घञ् स्वार्थे कः ।) कीलः । खोंटा गोंज खिल इत्यादि भाषा । गवां गात्रकण्डूयनार्थं गोष्ठे निखातस्तम्भः । इति सुभूतिः ॥ कण्डूयनार्थं काष्ठम् । इति केचित् । बन्धनखण्टः । इति केचित् । यत्र बद्धा गौर्दुह्यते सः । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । शिवकः २ । इत्यमरः २ । ९ । ७३ ॥

कीलसंस्पर्शः, पुं, (कीलं संस्पृशति । सम्+स्पृश्+अच् ।) दृष्टविशेषः । इति शब्दचन्द्रिका ॥ गाव इति भाषा ॥

कीला, स्त्री पुं, (कील+टाप् ।) कीलः । इत्यमरमेदिनीकरौ ॥

कीलालं, क्ली, (कीलं वह्निज्वालां अलति वारयतीति । कील+अल+कर्म्मण्यण् । यद्वा कीलात् वह्निशिखायाः शिखाग्रहणेनात्र वह्नेरेव ग्रहणमिति ध्येयम्, अतएवाग्नेः सकाशात् अलति पर्य्याप्नोति उत्पद्यते इति यावत् “अग्नेरापः” इति श्रुतेः । अल्+अच् ।) जलम् । (यथा, शृङ्गारकविकृते अम्बाष्टके २ ।
“कूलातिगामिभयतूलावलिज्वलनकीलानिजस्तुति-